**दिनाङ्क :-04.10.2024**

**प्रात: - 06:55**

**अथ वार्ताः**

**मन्त्रिमण्डल-पीएम-आरकेवीवाई-**

केन्द्रीयमन्त्रिमण्डलेन स्थायिकृषिप्रवर्धनाय प्रधानमन्त्री राष्ट्रीयकृषिविकासयोजना तथा कृषिस्वावलम्बनाय खाद्यसुरक्षाप्राप्त्ये (केवाई) इति कृषोन्नतितीयोजनायाः अनुमोदनं कृतम्। पीएम-आरकेवीवाई तथा कृषोन्नति योजना एकलक्षकोटिरूप्यकाणां कुलप्रस्तावितव्ययेन कार्यान्विता भविष्यति। अस्मिन् पीएम-आरकेवीवाई कृते सप्तपञ्चाशत् सहस्राधिक कोटिरूप्यकाणि, कृषोन्नतियोजनायाः कृते षड् चत्वारिंशत् अधिक द्वि शतोत्तर चतुः चत्वारिंशत् सहस्र कोटिरूप्यकाणि च समाविष्टानि सन्ति। कृषिकृषककल्याणविभागस्य प्रस्तावः, अस्य मन्त्रालयस्य अन्तर्गतं संचालितानाम् सर्वेषां केन्द्रप्रायोजितयोजनानां एतेषु द्विछत्रयोजनासु युक्तिकरणार्थं अनुमोदितः। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् मन्त्रिमण्डलसभायां गृहीताः निर्णयाः कृषकाणां आयवर्धनेन मध्यमवर्गीयजनानाम् खाद्यसुरक्षासुनिश्चयेन च सम्बद्धाः सन्ति।

**मन्त्रिमण्डल-तैलबीजाः**

सर्वकारेण चतुर्विंशत्यधिक द्विसहस्र, पञ्चविंशत्यधिक द्विसहस्र वर्षात् त्रिंशत्यधिक द्विसहस्र-एकत्रिंशत्यधिक द्वि सहस्र तम वर्ष पर्यन्तं खाद्यतैलानां - तैलबीजानां विषये राष्ट्रियाभियानं त्रयाधिकैकशतोत्तर दशसहस्र कोटिरूप्यकाणां परिव्ययस्य अनुमोदनं कृतम् अस्ति। आगामिषु सप्तवर्षेषु तैलबीजनिर्माणे भारतं स्वावलम्बनं कर्तुं उद्दिश्य एतत् कृतम् अस्ति। नवदिल्ल्यां सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् नवानुमोदितः एनएमईओ-तैलबीजः श्वेत-सर्षपः, कलायः इति मूंगफली, सोयाबीनः, सूर्यपुष्पः, तिलादीनां प्रमुखप्राथमिकतैलसस्यानां उत्पादनं वर्धयितुं केन्द्रीक्रियते।

**हरियाणा विधानसभानिर्वाचनम्**

हरियाणायां विधानसभा निर्वाचनस्य सर्वा: सज्जता: सम्पूरिता: सन्ति। नवति: सदस्यात्मिकाया: विधानसभाया: कृते एकस्मिन्नेव चरणे श्व: मतदानं भविष्यति। मतगणना च अक्तूबर-अष्टम-दिनांके जम्मू-कश्मीर-राज्येन सहैव भविष्यति। हरियाणायां निर्वाचनाभियानस्य ह्य: अन्तिम-दिवसे विभिन्न-दलीय-नेतार: स्वीय-प्रत्याशिनां कृते जनानां समर्थनमवाप्तुं अनेका: जनसभा: कृतवन्त:। भाजपा-दलस्य वरिष्ठ: नेता, असम राज्यस्य मुख्यमन्त्री च हिमंता बिस्व सरमा पलवल-क्षेत्रे जन-आशीर्वाद-सभां सम्बोधितवान्। उत्तराखण्डस्य मुख्यमन्त्रिणा पुष्कर-सिंह-धामिना अपि जनसभा एका सम्बोधिता।

**श्रीलंका-विदेशमंत्री यात्रा**

विदेशमन्त्री डॉ. सुब्रह्मण्यम जयशंकरः अद्य श्रीलङ्कादेशस्य आधिकारिकयात्रायां भविष्यति। गतसप्ताहे राष्ट्रपतिः अनुराकुमारदिसनायकेन पदभार ग्रहणानन्तरं भारत-श्रीलङ्का देशयोः मध्ये प्रथमः उच्चस्तरीयोपवेशनं भविष्यति। गतसप्ताहे राष्ट्रपतिः

अनुराकुमारदिसनायकेन कार्यभारं स्वीकृत्यानन्तरं कस्यापि विदेशमन्त्रिणः प्रथमा यात्रा भवति विदेशमन्त्री डॉ. एस् जयशंकरस्य यात्रा उभयोः देशयोः मध्ये द्विपक्षीय संबंधान् इतोपि सुदृढं कर्तुं भविष्यति।

## महिला क्रिकेट टी20- विश्वकप

संयुक्तअरब-अमीरातदेशस्य शारजाह-क्रिकेट-क्रीडाङ्गणे महिलानां आई.सी.सी. इत्येतस्या: विंशति-प्रति विंशति: प्रतिस्पर्धाया: नवमस्य संस्करणस्य औद्घटनिके द्वन्द्वे बाङ्गलादेशदलेन स्कॉटलैण्डदलं षोड्श धावनांकै: पराजितम्। अद्य भारतीयदलस्य प्रतिस्पर्धा न्यूजीलैण्डदलेन सह निर्धारिता अस्ति। तदनु रविवासरे भारत-पाकिस्तान-दलयोर्मध्ये द्वन्द्वं निश्चितमस्ति।